श्री अष्टलक्ष्मी महा मंत्रं

(ऋषिः - छंदः - देवता - ध्यान सहितं)

श्रीलक्ष्मीनारायणः

अस्य श्रीरमानाथमहामंत्रस्य -

नारायण ऋषिः - विराट् छंदः - लक्ष्मीनारायणो देवता -

अं बीजं - उं शक्तिः - मं कीलकं -

अस्य श्रीलक्ष्मीनारायणप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ॐ अंगुष्ठाभ्यां नमः ॐ नं तर्जनीभ्यां नमः

ॐ रं मध्यमाभ्यां नमः ॐ यं अनामिकाभ्यां नमः

ॐ णं कनिष्ठिकाभ्यां नमः ॐ यं करतलकरपृष्ठाभ्यां नमः

ॐ हृदयाय नमः ॐ नं शिरसे स्वाहा

ॐ रं शिखायै वषट् ॐ यं कवचाय हुं

ॐ णं नेत्राभ्यां वौषट् ॐ यं अस्त्राय फट्

ॐ भूर्भुवस्सुवरोमिति दिग्बंधः ॥

ध्यानं

श्रीवत्सवक्षसं विष्णुं चक्रशंखसमन्वितं ।

वामोरुविलसल्लक्ष्म्याऽऽलिंगितं पीतवाससं ॥

सुस्थिरं दक्षिणं पादं वामपादं तु कुंजितं ।

दक्षिणं हस्तमभयं वामं चालिंगितश्रियं ॥

शिखिपीतांबरधरं हेमयज्ञोपवीतिनं ।

एवं ध्यायेद्रमानाथं पश्चात्पूजां समाचरेत् ॥

मूलमंत्रं - ॐ नमो नारायणाय ।

श्री आदिलक्ष्मीः

अस्य श्री आदिलक्ष्मीमहामंत्रस्य -

भार्गव ऋषिः - अनुष्टुबादि नाना छंदांसि - श्री आदिलक्ष्मीर्देवता -

श्रीं बीजं - ह्रीं शक्तिः - ऐं कीलकं -

श्रीमदादि महालक्ष्मीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ॐ श्रीं अंगुष्ठाभ्यां नम ॐ ह्रीं तर्जनीभ्यां नमः

ॐ ऐं मध्यमाभ्यां नम ॐ श्रीं अनामिकाभ्यां नमः
ॐ ह्रीं कनिष्ठिकाभ्यां नमः ॐ ऐं करतलकरपृष्ठाभ्यां नमः
ॐ श्रीं हृदयाय नमः ॐ ह्रीं शिरसे स्वाहा
ॐ ऐं शिखायै वषट् ॐ श्रीं कवचाय हुं
ॐ स्रौं नेत्राभ्यां वौषट् ॐ स्रः अस्त्राय फट्
ॐ भूर्भुवस्सुवरोमिति दिग्बंधः ॥

ध्यानं
द्विभुजां च द्विनेत्रां च साभयां वरदान्वितां ।
पुष्पमालाधरां देवीं अंबुजासनसंस्थितां ॥

पुष्पतोरणसम्युक्तां प्रभामंडलमंडितां ।
सर्वलक्षणसम्युक्तां सर्वाभरणभूषितां ॥

पीतांबरधरां देवीं मकुटीचारुबंधनां ।
सौंदर्यनिलयां शक्तिं आदिलक्ष्मीमहं भजे ॥

मूलमंत्रं - ॐ श्रीं आदिलक्ष्म्यै नमः ।

श्रीसंतानलक्ष्मी
अस्य श्रीसंतानलक्ष्मीमहामंत्रस्य -
भृगु ऋषिः - निचृत् छंदः - श्रीसंतानलक्ष्मीः देवता -
श्रीं बीजं - ह्रीं शक्तिः - क्लीं कीलकं -
अस्य श्रीसंतानलक्ष्मीप्रसादसिद्ध्यर्थे जपे विनियोगः ।
ॐ स्रां अंगुष्ठाभ्यां नमः ॐ स्रीं तर्जनीभ्यां नमः
ॐ स्रूं मध्यमाभ्यां नमः ॐ स्रैं अनामिकाभ्यां नमः
ॐ स्रौं कनिष्ठिकाभ्यां नमः ॐ स्रः करतलकरपृष्ठाभ्यां नमः
ॐ स्रां हृदयाय नमः ॐ स्रीं शिरसे स्वाहा
ॐ स्रूं शिखायै वषट् ॐ स्रैं कवचाय हुं
ॐ स्रौं नेत्राभ्यां वौषट् ॐ स्रः अस्त्राय पट्
ॐ भूर्भुवस्सुवरोमिति दिग्बंधः ॥

ध्यानं

जटामकुटसम्युक्तां स्थिरासन्समन्वितां ।

अभयं कटकंचैव पूर्णकुंभं करद्वये ॥

कंचुकं सन्नवीतंच मौक्तिकंचापि धारिणीं ।

दीपचामरहस्ताभिः सेवितां पार्श्वयोर्द्वयोः ॥

बालसेनानिसंकाशां करुणापूरिताननां ।

महाराज्ञीं च संतानलक्ष्मीमिष्टार्थसिद्धये ॥

मूलमंत्रं - ॐ श्रीं संतानलक्ष्म्यै नमः ।

श्रीगजलक्ष्मीः

अस्य श्रीगजलक्ष्मीमहामंत्रस्य -

शुक्र ऋषिः - अनुष्टुप् छंदः - गजलक्ष्मीः देवता -

कं बीजं - मं शक्तिः - लं कीलकं -

श्रीगजलक्ष्मीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ॐ क्रां अंगुष्ठाभ्यां नमः ।

ॐ क्रीं तर्जनीभ्यां नमः ।

ॐ क्रूं मध्यमाभ्यां नमः ।

ॐ क्रैं अनामिकाभ्यां नमः ।

ॐ क्रौं कनिष्ठिकाभ्यां नमः ।

ॐ क्रः करतलकरपृष्ठाभ्यां नमः ॥

ॐ क्रां हृदयाय नमः ।

ॐ क्रीं शिरसे स्वाहा ।

ॐ क्रूं शिखायै वषट् ।

ॐ क्रैं कवचाय हुं ।

ॐ क्रौं नेत्राभ्यां वौषट् ।

ॐ क्रः अस्त्राय पट् ।

ॐ भूर्भुवस्सुवरोमिति दिग्बंधः ॥

ध्यानं ।
चतुर्भुजां महालक्ष्मीं गजयुग्मसुपूजितां ।
पद्मपत्राभनयनां वराभयकरोज्ज्वलां ॥

ऊर्ध्वं करद्वये चाब्जं दधतीं शुक्लवस्त्रकं ।
पद्मासने सुखासीनां गजलक्ष्मीमहं भजे ॥

मूलमंत्रं - ॐ श्रीं गजलक्ष्म्यै नमः ।

श्रीधनलक्ष्मीः
अस्य श्रीधनलक्ष्मीमहामंत्रस्य -
परब्रह्म ऋषिः - अनुष्टुप्छंदः - श्रीधनलक्ष्मीः देवता -
लं बीजं - धं शक्तिः - मं कीलकं -
श्रीधनलक्ष्मीप्रसादसिद्ध्यर्थे जपे विनियोगः ।
ॐ त्रां अंगुष्ठाभ्यां नमः ॐ त्रीं तर्जनीभ्यां नमः
ॐ त्रूं मध्यमाभ्यां नमः ॐ त्रैं अनामिकाभ्यां नमः
ॐ त्रौं कनिष्ठिकाभ्यां नमः ॐ त्रः करतलकरपृष्ठाभ्यां नमः
ॐ त्रां हृदयाय नमः ॐ त्रीं शिरसे स्वाहा
ॐ त्रूं शिखायै वषट् ॐ त्रैं कवचाय हुं
ॐ त्रौं नेत्राभ्यां वौषट् ॐ त्रः अस्त्राय फट्
ॐ भूर्भुवस्सुवरोमिति दिग्बंधः ॥

ध्यानं
किरीटमुकुटोपेतां स्वर्णवर्णसमन्वितां ।
सर्वाभरणसम्युक्तां सुखासनसमन्वितां ॥

परिपूर्णंच कुंभंच दक्षिणेन करेण तु ।
चक्रं बाणंच तांबूलं तदा वामकरेण तु ॥

शंखं पद्मंच चापंच कुंडिकामपि धारिणीं ।
सकंचुकस्तनीं ध्यायेत् धनलक्ष्मीं मनोहरां ॥

मूलमंत्रं - ॐ श्रीं धनलक्ष्म्यै नमः ।

श्रीधान्यलक्ष्मीः

अस्य श्रीधान्यलक्ष्मीमहामंत्रस्य -

परब्रह्म ऋषिः - अनुष्टुप्छंदः - श्री धान्यलक्ष्मीः देवता -

धं बीजं - लं शक्तिः - मं कीलकं -

श्रीधान्यलक्ष्मीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ॐ द्रां अंगुष्ठाभ्यां नमः ।

ॐ द्रीं तर्जनीभ्यां नमः ।

ॐ द्रूं मध्यमाभ्यां नमः ।

ॐ द्रैं अनामिकाभ्यां नमः ।

ॐ द्रौं कनिष्ठिकाभ्यां नमः ।

ॐ द्रः करतलकरपृष्ठाभ्यां नमः ॥

ॐ द्रां हृदयाय नमः ।

ॐ द्रीं शिरसे स्वाहा ।

ॐ द्रूं शिखायै वषट् ।

ॐ द्रैं कवचाय हुं ।

ॐ द्रौं नेत्राभ्यां वौषट् ।

ॐ द्रः अस्त्राय फट् ।

ॐ भूर्भुवस्सुवरोमिति दिग्बंधः ॥

ध्यानं ।

वरदाभयसम्युक्तां किरीटमकुटोज्ज्वलां ।

अंबुजंचेक्षुशालिंच कदंबफलद्रोणिकां ॥

पंकजंचाष्टहस्तेषु दधानां शुक्लरूपिणीं ।

कृपामूर्तिं जटाजूटां सुखासनसमन्वितां ॥

सर्वालंकारसम्युक्तां सर्वाभरणभूषितां ।

मदमत्तां मनोहारिरूपां धान्यश्रियं भजे ॥

मूलमंत्रं - ॐ श्रीं धान्यलक्ष्म्यै नमः ।

श्रीविजयलक्ष्मीः ।

अस्य श्रीविजयलक्ष्मीमहामंत्रस्य -

नारद ऋषिः - नाना छंदांसि - श्रीविजयलक्ष्मीः देवता -

लं बीजं - क्षं शक्तिः - यं कीलकं -

सर्वकार्यसिद्धिद्वारा श्रीविजयलक्ष्मीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ॐ व्रां अंगुष्ठाभ्यां नमः ।

ॐ व्रीं तर्जनीभ्यां नमः ।

ॐ व्रूं मध्यमाभ्यां नमः ।

ॐ व्रैं अनामिकाभ्यां नमः ।

ॐ व्रौं कनिष्ठिकाभ्यां नमः ।

ॐ व्रः करतलकरपृष्ठाभ्यां नमः ॥

ॐ व्रां हृदयाय नमः ।

ॐ व्रीं शिरसे स्वाहा ।

ॐ व्रूं शिखायै वषट् ।

ॐ व्रैं कवचाय हुं ।

ॐ व्रौं नेत्राभ्यां वौषट् ।

ॐ व्रः अस्त्राय फट् ।

ॐ भूर्भुवस्सुवरोमिति दिग्बंधः ॥

ध्यानं ।

अष्टबाहुयुतां देवीं सिम्हासनवरस्थितां ।

सखासनां सुकेशींच किरीटमुकुटोज्ज्वलां ॥

श्यामांगीं कोमलाकारां सर्वाभरणभूषितां ।

खड्गं पाशं तदा चक्रमभयं सव्यहस्तके ॥

खेटकंचांकुशं शंखं वरदं वामहस्तके ।

राजरूपधरां शक्तिं प्रभासौंदर्यशोभितां ॥

हंसारूढां स्मरेद्देवीं विजयां विजयप्रदे ॥

मूल्मंत्रं - ॐ श्रीं विजयलक्ष्म्यै नमः ।

श्रीधैर्य(वीर)लक्ष्मीः

अस्य श्रीवीरलक्ष्मीमहामंत्रस्य -

नारद ऋषिः - त्रिष्टुप्छंदः - श्रीवीरलक्ष्मीः देवता -

लं बीजं - रं शक्तिः - लं कीलकं -
आरोग्यभाग्यसिद्धिद्वारा श्रीवीरलक्ष्मीप्रसादसिद्ध्यर्थे जपे विनियोगः ।
ॐ व्रां अंगुष्ठाभ्यां नमः ।
ॐ व्रीं तर्जनीभ्यां नमः ।
ॐ व्रूं मध्यमाभ्यां नमः ।
ॐ व्रैं अनामिकाभ्यां नमः ।
ॐ व्रौं कनिष्ठिकाभ्यां नमः ।
ॐ व्रः करतलकरपृष्ठाभ्यां नमः ॥

ॐ व्रां हृदयाय नमः ।
ॐ व्रीं शिरसे स्वाहा ।
ॐ व्रूं शिखायै वषट् ।
ॐ व्रैं कवचाय हुं ।
ॐ व्रौं नेत्राभ्यां वौषट् ।
ॐ व्रः अस्त्राय फट् ।
ॐ भूर्भुवस्सुवरोमिति दिग्बंधः ॥

ध्यानं ।
अष्टबाहुयुतां लक्ष्मीं सिम्हासनवरस्थितां ।
तप्तकांचनसंकाशां किरीटमकुटोज्ज्वलां ॥

स्वर्णकंचुकसंयुक्तां सन्नवीततरां शुभां ।
अभयं वरदं चैव भुजयोः सव्यवामयोः ॥

चक्रं शूलंच बाणंच शंखं चापं कपालकं ।
दधतीं धैर्यलक्ष्मीं च नवतालात्मिकां भजे ॥

मूलमंत्रं - ॐ श्रीं वीरलक्ष्म्यै नमः ।

श्री ऐश्वर्य(महा)लक्ष्मीः
अस्य श्रीमहालक्ष्मीमहामंत्रस्य -
ब्रह्मा ऋषिः - जगती छंदः - श्रीमहालक्ष्मीः देवता -
ह्रां बीजं - ह्रीं शक्तिः - ह्रूं कीलकं -
श्रीमहालक्ष्मीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ॐ क्षां अंगुष्ठाभ्यां नमः ।

ॐ क्षीं तर्जनीभ्यां नमः ।

ॐ क्षूं मध्यमाभ्यां नमः ।

ॐ क्षैं अनामिकाभ्यां नमः ।

ॐ क्षौं कनिष्ठिकाभ्यां नमः ।

ॐ क्षः करतलकरपृष्ठाभ्यां नमः ॥

ॐ क्षां हृदयाय नमः ।

ॐ क्षीं शिरसे स्वाहा ।

ॐ क्षूं शिखायै वषट् ।

ॐ क्षैं कवचाय हुं ।

ॐ क्षौं नेत्राभ्यां वौषट् ।

ॐ क्षः अस्त्राय फट् ।

ॐ भूर्भुवस्सुवरोमिति दिग्बंधः ॥

ध्यानं ।

चतुर्भुजां द्विनेत्रांच वराभयकरान्वितां ।

अब्जद्वयकरांभोजां अंबुजासनसंस्थितां ॥

ससुवर्णघटोराभ्यां प्लाव्यमानां महाश्रियं ।

सर्वाभरणशोभाढ्यां शुभ्रवस्त्रोत्तरीयकां ॥

चामरग्रहनारीभिः सेवितां पार्श्वयोर्द्वयोः ।

आपादलंबिवसनां करंडमकुटां भजे ॥

मूलमंत्रं - अं श्रीं श्रीमहालक्ष्म्यै नमः ॥

इति श्रीअष्टलक्ष्मीमहामंत्रं संपूर्णं ।